श्रीजैनयशोविजयग्रन्थमाला (१)

र्भाः ॥

श्रीवादिदेवसूरिविरचित

प्रमाणनयतत्त्वालोकालङ्कारः ।

श्रीकाशीस्थ न्यायविशारद महामहोपाध्याय
श्रीयशोविजय नामाङ्कित श्वेताम्बर जैन
संस्कृत पाठशालातः प्रादुर्भूतः

काश्यां
चन्द्रप्रभायन्त्रागारे मुद्रितश्च
वीर सं० २४३० सन् १९०४

। प्रकामं
ल्लीवनेषु
। प्रीणयन्ती
माद्दग् वत्सान् जयति जगति श्रीगवीदेवसूरेः
“श्रीरत्नप्रभाचार्यः”

अर्हम्

प्रस्तावना ।

अथास्यां संसृतिसरण्यां समागत्य सर्वे शरीरिणः शान्तिशकलमप्यनासादयन्तः समयसरीसृपशीर्णाः संसारापारपारावारपारमुपसर्तुमपारयन्तः परममपारमार्थिकपदमपि पुण्यपद्यया प्राप्तुमपारमार्थिकं मन्वानाः क्षोदिष्ठप्रज्ञया सर्वाऽवज्ञया च पाञ्चभौतिकपिण्डप्रेष्ठाः कलिकल्मषकालिमकलङ्कद्राघिष्ठा विषमविषविषयाशीविषदष्टविशीर्णविषस्केष्ठाः किंवा विषकीटा इव विषयविषभुजो ऽनादिदुर्वासनावासितबुद्धयश्चाहमहमिकामेव परमपुरुषार्थं साधिष्ठमाकलयन्तोवलिताश्च गरिष्ठाहोपुरुषिकया प्रत्यहं पितृवने दीर्घनिद्रासुखमनुभवन्तः क्रियासमभिहारेण ह्रसिष्ठजननीजठरे वसन्तः सांसारिकानेकबंहिष्ठकटुक्लेशपाशिताः सुप्तप्रबुद्धा इव प्रबुद्धसुप्ता इव तिष्ठन्ति ।

तदत्र किं कारणं कोहेतुः किं प्रयोजनं कस्मादित्थमिति साम्रेडितप्रश्नावसरे सर्वमेतदविद्याविलाससाम्राज्येनेति बारं वारं वयमुत्तरयामः ।

हंहो विलक्षणशेमुषीका विचक्षणाः! शुभवन्तो भवन्तः सहृदयहृदयसन्तोषप्रददन्तोषितरसज्ञ रसज्ञा रस ज्ञापितं कर्ण्यं-तांवहत्किमपि श्वःश्रेयसमिदमाकर्ण्य नीरक्षीरविवेचनविलक्षणचेतनाचातुरीचमत्कारचमत्कृताः सकृदप्योमिति ब्रूयुः ।

अविद्यानिरासार्थमेव प्रयतमानैरस्माभिः श्रीजैनयशोविजय-ग्रन्थमाला ऽनर्घ्यमणिगणगुम्फिता हारभूतेव भवतां श्रीमता-मुपहारीयते ।

तस्यामेकेयं मणीरामायिता प्रमाणनयतत्वालोकालङ्कार-रूपा सर्वोपरि सुमेरुभूतेव विलसति ।

अमुं ग्रन्थं श्री १०८ सुगृहीतनाम्नोवादिप्रवरदेवसूरेर्मु-खाम्भोजनिर्गलितामृतधाराऽऽसारमिव प्रमाणनयतत्वालोका-लङ्कारमदृष्टपूर्वं जैनमतमन्तव्यप्रमाणविचारकरं दुर्वादिवाद-वासनानिर्यातनपरं विलक्षणभङ्गीकं सप्तभङ्गीतरङ्गरिङ्गितं निबन्धं निरीक्ष्य किमिदं कथमिदं कस्येदं कीदृक्षमिदमिति स्वभावेनैव जिज्ञासवः संपत्स्यन्ते तत्त्वग्रहाग्रहग्रहिलाः शास्त्र-प्रियाप्रिया स्तदत्रावश्यकं किञ्चनोपन्यस्तुम् ।

तत्र प्रथममवधेयं धीमद्धौरेयैस्तत्रभवद्भिः, यत्कस्यापि मतस्य तत्त्वमनाकलय्य खण्डनमण्डनबद्धपरिकरा ये यथा-

जाताः सलभा इव परिपतन्ति ते लभन्ते न स्वात्मविना शाद्दते किञ्चिदपि भावुकम् ।

श्रीवादिदेवसूरिभगवतोऽन्तेवासी श्रीरत्नप्रभसूरिर्वसुलोकार्क १२३८ मिते विक्रमाब्दे निजनिर्मितोपदेशमालाटीकायामेवं व्यलेखीत् ।

शिष्यः श्रीमुनिचन्द्रसूरिमुनिभिर्गीतार्थचूडामणिः
पट्टे स्वे विनिवेशितस्तदनु स श्रीदेवसूरिप्रभुः ।
अस्थाने जयसिंहदेवनृपतेर्येनास्तदिग्वाससा
स्त्रीनिर्याणसमर्थनेन विजयस्तम्भः समुत्तम्भितः ॥

तत्पट्टप्रभवोभवन्नथ गुणग्रामाभिरामोदयाः
श्रीभद्रेश्वरसूरयः शुचिधियस्तन्मानसप्रीतये ।
श्रीरत्नप्रभसूरिभिः शुभकृते श्रीदेवसूरिप्रभोः
शिष्यैः सेयमकारि संमदकृते वृत्तिर्विशेषार्थिनाम् ॥

तथा च ।

विक्रमाद् वसुलोकार्क १२३८ वर्षे माघ समार्थिता
एकादश सहस्राणि मानं सार्धं शतं तथा ॥ ११५०

अस्माद् श्रीरत्नप्रभसूरेः समयः स्फुटमेवावभाति–

किञ्च किञ्चिन्न्यूनाधिकः सएव समयस्तदीयगुरोर्देव सूरेरपि चास्मादेवानिर्णेतुं शक्यस्तथापि दुर्बद्धं सुबद्धमिति न्यायेन पुनः प्रमाणान्तरं प्रदर्श्यते ।

श्रीमुनिसुन्दरसूरिणा रसर्तुमनुमिते १४६६ ऽब्दे *गुर्वावल्यामेवं व्यलेखि ।

अष्टहयेशमितेब्दे ११७८ विक्रमकालाद्दिवं गतो भगवान् ।
श्रीमुनिचन्द्रमुनीन्द्रो ददातु भद्राणि संघाय ॥ ७१ ॥

तस्मादभूदजितदेवगुरुर्गरीयान्
प्राच्यस्तपः श्रुतिनिधिर्जलधिर्गुणानाम् ।
श्रीदेवसूरिरपरश्च जगत्प्रसिद्धो
वादीश्वरोस्तगुणचन्द्रमदोपि बाल्ये ॥ ७२ ॥

येनार्दितश्चतुरसीतिसुवादिलीला-
लब्धोल्लसज्जयरमामदकेलिशाली ।
वादाहवे कुमुदचन्द्रदिगम्बरेन्द्रः
श्रीसिद्धभूमिपतिसंसदि पत्तनेऽस्मिन् ॥ ७३ ॥

वेदमुनीशमिते ११७४ ऽब्दे देवगुरुर्जगदनुत्तरोभ्युदितः ।
श्रीमुनिचन्द्रगुरोरिति शिष्या बहवोभवन् विदिताः ॥ ७४ ॥

* रसरसमनुमितवर्षे १४६६ मुनिसुन्दरसूरिणाकृतापूर्वम् ।
मध्यस्थै रवधार्या गुर्वावलीयं जयश्रीद्धा ॥ ८६ ॥

अस्मादपि स्फुटतरः समयोद्दीपवद्देदीप्यते ।

श्रीपूज्यपाददेवसूरिरेव प्रमाणनयतत्वालोकालङ्कारस्य रत्नाकरनाम्नीं महाव्याख्यां रचितवान् ।

तद् विषयेपि गुर्वावल्यां लिखितमस्ति—

स्याद्वादरत्नाकरतर्कवेधा मुदे स केषां नहि देवसूरिः।
यतश्चतुर्विंशतिसूरिशाखं यस्यैव नाम्ना विदितं बभूव ७४

देवसूरिशिष्यैः श्रीरत्नप्रभसूरिभिर्नातिलघीयसी रत्नाकरावतारिका नाम्नी टीका विनिर्मितास्ति। या मूलटिप्पणपञ्जिकाभिः सहिता मुद्रणालये मुद्रयितुमारब्धा तस्यामेवं लिलेख श्रीरत्नप्रभः ।

यैरत्र स्वप्रभया दिगम्बरस्यार्पिता परा भूतिः ।
प्रत्यक्षं विबुधानां जयन्तु ते देवसूरयोनव्याः ॥ ३ ॥

श्रीमल्लधारिराजशेखरसूरिणा पञ्जिकाकारेणापि लिखितमस्ति।

स्याद्वादरत्नाकर इत्यस्ति ग्रन्थोमहत्तमः ।
वादिवृन्दारकश्रीमद्देवसूरिविनिर्मितः ॥ ४ ॥

न्यायशास्त्रस्यायमद्वितीयोग्रन्थः

अत्राष्टौ परिच्छेदाः सन्ति।

तत्र प्रथमपरिच्छेदे-प्रमाणस्वरूपनिर्णयः।

द्वितीये परिच्छेदे-प्रत्यक्षस्वरूपनिर्णयः।

तृतीयपरिच्छेदे-स्मरणप्रत्यभिज्ञानतर्कानुमानस्वरूपनिर्णयः

चतुर्थपरिच्छेदे-आगमाख्यप्रमाणस्वरूपनिर्णयः।

पञ्चमपरिच्छेदे-विषयस्वरूपनिर्णयः।

षष्ठपरिच्छेदे-फलप्रमाणस्वरूपाद्याभासनिर्णयः।

सप्तमपरिच्छेदे-नयात्मस्वरूपनिर्णयः।

अष्टमपरिच्छेदे-वादिप्रवादिन्यायनिर्णयः।

एतद्ग्रन्थमुद्रणावसरे पञ्चषाणि पुस्तकानि प्राप्तानि, तेषांमध्ये

१ श्री महामान्यधन्यतम धर्मविजयमुनीन्द्रतो लब्ध-मेकं पुस्तकम्।

२ श्री मुनिराज वीरविजयेन दत्तमेकं पुस्तकम्।

३ श्रीमुनिना अमिविजयेन महाशयेनापिपुस्तकमेकं समर्पितम्।

४ श्रीकेशरविजयमुनितोपि पुस्तकमेकं समासादितम्।

५ भावनगरस्थश्राद्धवर्य्य कुंवरजी आनन्दजी इत्यनेन श्रावकेनात्र महती सहायता दत्ता।

६ श्रीपं. अम्बादत्तशास्त्रिणां समीपेपुस्तमेकमाप्तम्।

पूर्वोक्तमहाशयानां भूयांसं परिश्रमं चोपकृतिं च तेषां सप्रश्रयमङ्गीकरोतीयं पाठशाला।

यद्यपि पूर्वोक्तानि पुस्तकानि दृष्ट्वा शोधितोयं ग्रन्थस्तथापि मनुष्यसहभूर्भ्रान्तिर्दुर्वारा तदत्र दृष्टिदोषात् शीशकाक्षरयोजनदोषाद् वा या काचना ऽशुद्धिर्भवेत् तत्स्वपुस्तके परिमृज्य कृपया पाठशालामपि सूचयेयुः सज्जनाः

इतिप्रार्थयते

काशीस्थजैनयशोविजयसंस्कृतपाठशाला।

॥ श्रीः ॥

श्रीवादिदेवसूरिविरचित

प्रमाणनयतत्त्वालो-कालङ्कारः ।

प्रथमः परिच्छेदः ।

रागद्वेषविजेतारं ज्ञातारं विश्ववस्तुनः ।
शक्रपूज्यं गिरामीशं तीर्थेशं स्मृतिमानये ॥ १ ॥

प्रमाणनयतत्त्वव्यवस्थापनार्थमिदमुपक्रम्यते १ ॥

स्वपरव्यवसायिज्ञानं प्रमाणम् ॥ २ ॥

अभिमतानभिमतवस्तुस्वीकारतिरस्कार-क्षमं हि प्रमाणमतोज्ञानमेवेदम् ॥ ३ ॥

नवै सन्निकर्षादेरज्ञानस्य प्रामाण्यमुपपन्नंत-

स्यार्थान्तरस्येव स्वार्थव्यवसितौ साधकतम-
त्वानुपपत्तेः ॥ ४ ॥

नखल्वस्य स्वनिर्णीतौ करणत्वं स्तंभादेरि-
वाचेतनत्वात् नाप्यर्थनिश्चितौ स्वनिश्च-
तावकरणस्य कुंभादेरिवतत्राप्यकरणत्वात् ५॥

तद्व्यवसायस्वभावं समारोपपरिपन्थित्वात्-
प्रमाणत्वाद्वा ॥ ६ ॥

अतस्मिँस्तदध्यवसायः समारोपः ॥ ७ ॥

सविपर्ययसंशयानध्यवसायभेदात्त्रेधा ॥८॥

विपरीतैककोटिनिष्टङ्कनं विपर्ययः ॥ ९ ॥

यथा शुक्तिकायामिदं रजतमिति ॥१०॥

साधकबाधकप्रमाणाभावादनवस्थिता-
नेककोटिसंस्पर्शिज्ञानं संशयः ॥ ११ ॥

यथाऽयं स्थाणुर्वा पुरुषोवेति ॥ १२ ॥

किमित्यालोचनमात्रमनध्यवसायः ॥१३॥

यथा गच्छतस्तृणस्पर्शज्ञानम् ॥ १४ ॥

ज्ञानादन्योऽर्थः परः ॥ १५ ॥

स्वस्य व्यवसायः स्वाभिमुख्येन प्रकाशनं बाह्यस्येव तदाभिमुख्येन करिकलभकमहमात्मना जानामीति ॥ १६ ॥

कः खलु ज्ञानस्यालम्बनं बाह्यं प्रतिभातमभिमन्यमानस्तदपि तत्प्रकारं नाभिमन्येत मिहिरालोकवत् ॥ १७ ॥

ज्ञानस्य प्रमेयाव्यभिचारित्वं प्रामाण्यम् १८ ॥

तदितरत्त्वप्रामाण्यम् ॥ १९ ॥

तदुभयमुत्पत्तौ परत एव ज्ञप्तौ तु स्वतः परतश्चेति ॥ २० ॥

श्रीदेवाचार्यनिर्मिते प्रमाणनयतत्त्वालोकालङ्कारे प्रमाणस्वरूपनिर्णयो नाम प्रथमः परिच्छेदः ॥ १ ॥

अथ द्वितीयः परिच्छेदः

तद्विभेदं प्रत्यक्षं च परोक्षं च ॥ १ ॥

स्पष्टं प्रत्यक्षम् ॥ २ ॥

अनुमानाद्याधिक्येन विशेषप्रकाशनं स्पष्टत्वम् ॥ ३ ॥

तद्विप्रकारं सांव्यवहारिकं पारमार्थिकं च॥४॥

तत्राद्यं द्विविधमिन्द्रियनिबन्धनमनिन्द्रियनिबन्धनं च ॥ ५ ॥

एतद्द्वितयमवग्रहेहावायधारणाभेदादेकश[1]श्चतुर्विकल्पकम् ॥ ६ ॥

विषयविषयिसन्निपातानन्तरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवान्तरसामान्याकारविशिष्टवस्तुग्रहणमवग्रहः ॥ ७ ॥

अवगृहीतार्थविशेषाकाङ्क्षणमीहा ॥ ८ ॥

---

१ 'एकैकश' इत्यपिपाठान्तरम् ।

ईहितविशेषनिर्णयोऽवायः ॥ ९ ॥

स एव दृढतमावस्थापन्नो धारणा ॥ १० ॥

संशयपूर्वकत्वादीहायाः संशयाद्भेदः ॥ ११ ॥

कथञ्चिदभेदेऽपि परिणामविशेषादेषां व्यपदेशभेदः ॥ १२ ॥

असामस्त्येनाप्युत्पद्यमानत्वेनासङ्कीर्णस्वभावतया ऽनुभूयमानत्वादपूर्वापूर्ववस्तुपर्यायप्रकाशकत्वात् क्रमभावित्वाच्चैते व्यतिरिच्यन्ते ॥ १३ ॥

क्रमोऽप्यमीषामयमेव तथैव संवेदनात् ॥ १४ ॥

एवं क्रमाविर्भूतनिजकर्मक्षयोपशमजन्यत्वाच्च ॥ १५ ॥

अन्यथा प्रमेयानवगतिप्रसङ्गः ॥ १६ ॥

तथाहि नखल्वदृष्टमवगृह्यते न चानवगृहीतं-

सन्दिह्यते नचासन्दिग्धमीह्यते नचानीहि-
तमवेयते नाप्यनवेतं धार्यते ॥ १७॥

क्वचित् क्रमस्यानुपलक्षणमेषामाशूत्पादादुत्प-
लपत्रशतव्यतिभेदक्रमवत् ॥ १८॥

पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्षम् १९॥

तद्विकलं सकलं च ॥ २०॥

तत्र विकलमवधिमनःपर्यायज्ञानरूपतया-
द्वेधा ॥२१॥

अवधिज्ञानावरणविलयविशेषसमुद्भवं भव-
गुणप्रत्ययं रूपिद्रव्यगोचरमवधिज्ञानम्॥२२॥

संयमविशुद्धिनिबन्धनाद्विशिष्टावरणविच्छे-
दाज्जातं मनोद्रव्यपर्यायालम्बनं मनःपर्याय-
ज्ञानम् ॥ २३ ॥

सकलंतुसामग्रीविशेषतः समुद्भूतसमस्ताव-

रणक्षयापेक्षं निखिलद्रव्यपर्यायसाक्षात्कारि-स्वरूपं केवलज्ञानम् ॥२४॥

तद्वानर्हन्निर्दोषत्वात् ॥ २५॥

निर्दोषोसौ प्रमाणाविरोधिवाक्त्वात्॥२६॥

तदिष्टस्यप्रमाणेनाबाध्यमानत्वात् तद्वा-चस्तेनाविरोधसिद्धिः ॥ २७॥

नच कवलाहारवत्वेन तस्यासर्वज्ञत्वं कवला-हारसर्वज्ञत्वयोराविरोधात् ॥ २८॥

इतिप्रत्यक्षस्वरूपनिर्णयोनाम द्वितीयः परिच्छेदः ॥ २ ॥

अथ तृतीयः परिच्छेदः

अस्पष्टं परोक्षं स्मरणप्रत्यभिज्ञानतर्कानुमा-नागमभेदतस्तत्पञ्चप्रकारं तत्रसंस्कारप्र-

बोधसंभूतमनुभूतार्थविषयं तदित्याकारं संवेदनं स्मरणम् ॥ १ ॥

तत्तीर्थकरबिम्बमिति यथा ॥ २ ॥

अनुभवस्मृतिहेतुकं तिर्यगूर्द्धतासामान्यादिगोचरं सङ्कलनात्मकं ज्ञानं प्रत्यभिज्ञानम् ३

यथा तज्जातीयएवायं गोपिण्डो गोसदृशो गवयः स एवायं जिनदत्त इत्यादि ॥ ४ ॥

उपलम्भानुपलम्भसम्भवं त्रिकालीकलितसाध्यसाधनसंबन्धाद्यालम्बनमिदमस्मिन् सत्येवभवतीत्याद्याकारं संवेदनमूहापरनामा तर्कः ॥ ५ ॥

यथा यावान् कश्चित्धूमःस सर्वोवह्नौसत्येवभवतीति तस्मिन्नसत्यसौ नभवत्यवेति ६॥

अनुमानं द्विप्रकारं स्वार्थं परार्थं च ॥ ७ ॥

तत्र हेतुग्रहणसम्बन्धस्मरणकारणकं साध्य-
विज्ञानं स्वार्थम् ॥ ८ ॥

निश्चितान्यथानुपपत्त्येकलक्षणो हेतुः ॥ ९ ॥

नतु त्रिलक्षणकादिः ॥ १० ॥

तस्य हेत्वाभासस्यापि सम्भवात् ॥ ११ ॥

अप्रतीतमनिराकृतमभीप्सितं साध्यम् ॥ १२ ॥

शङ्कितविपरीतानध्यवसितवस्तूनां साध्य-
ताप्रतिपत्त्यर्थमप्रतीतवचनम् ॥ १३ ॥

प्रत्यक्षादिविरुद्धस्य साध्यत्वं मा प्रसज्यता-
मित्यनिराकृतग्रहणम् ॥ १४ ॥

अनभिमतस्यासाध्यत्वप्रतिपत्तयेऽभीप्सित-
पदोपादानम् ॥ १५ ॥

व्याप्तिग्रहणसमयापेक्षया साध्यं धर्म एवान्य-
था तदनुपपत्तेः ॥ १६ ॥

नहि यत्र यत्र धूमस्तत्र तत्र चित्रभानोरिव धरित्रीधरस्याप्यनुवृत्तिरस्ति ॥ १७ ॥

आनुमानिकप्रतिपत्त्यवसरापेक्षया तु पक्षापरपर्यायस्तद्विशिष्टः प्रसिद्धो धर्म्मी ॥ १८ ॥

धर्म्मिणः प्रसिद्धिः क्वचिद्विकल्पतः कुत्रचित्प्रमाणतः क्वापि विकल्पप्रमाणाभ्याम् १९

यथा समस्तिसमस्तवस्तुवेदी क्षितिधरकन्धरेयं धूमध्वजवती ध्वनिः परिणतिमानिति २० ॥

पक्षहेतुवचनात्मकं परार्थमनुमानमुपचारात् ॥ २१ ॥

साध्यस्य प्रतिनियतधर्म्मिसंबन्धिता प्रसिद्धये हेतोरुपसंहारवचनवत्पक्षप्रयोगोप्यवश्यमाश्रयितव्यः ॥ २२ ॥

त्रिविधं साधनमभिधायैव तत्समर्थनं विद-

धानःकः खलु न पक्षप्रयोगमङ्गीकुरुते ॥ २३ ॥

प्रत्यक्षपरिच्छिन्नार्थाभिधायिवचनं परार्थं प्रत्यक्षं परप्रत्यक्षहेतुत्वात् ॥ २४ ॥

यथा पश्य पुरः स्फुरत्किरणमणिखण्डमण्डिताभरणभारिणीं जिनपतिप्रतिमामिति २५ ॥

पक्षहेतुवचनलक्षणमवयवद्वयमेव परप्रतिपत्तेरङ्गं न दृष्टान्तादिवचनम् ॥ २६ ॥

हेतुप्रयोगस्तथोपपत्त्यन्यथानुपपत्तिभ्यां द्विप्रकारः ॥ २७ ॥

सत्येव साध्ये हेतोरुपपत्तिस्तथोपपत्तिः । असति साध्ये हेतोरनुपपत्तिरेवान्यथानुपपत्तिः २८

यथा कृशानुमानयंपाकप्रदेशः सत्येव कृशानुमत्त्वे धूमवत्त्वस्योपपत्तेरसत्यनुपपत्तेर्वेति २९

अनयोरन्यतरप्रयोगेणैव साध्यप्रतिपत्तौ द्वितीयप्रयोगस्यैकत्रानुपयोगः ॥ ३० ॥

नदृष्टान्तवचनं परप्रतिपत्तये प्रभवति तस्यां पक्षहेतुवचनयोरेव व्यापारोपलब्धेः ३१

नच हेतोरन्यथानुपपत्तिनिर्णीतये यथोक्ततर्कप्रमाणादेव तदुपपत्तेः ॥ ३२ ॥

नियतैकविशेषस्वभावे च दृष्टान्ते साकल्येन व्याप्तेरयोगतो विप्रतिपत्तौ तदन्तरापेक्षायामनवस्थितेर्दुर्निवारः समवतारः ॥ ३३ ॥

नाप्यविनाभावस्मृतये प्रतिपन्नप्रतिबन्धस्य-व्युत्पन्नमतेः पक्षहेतुप्रदर्शनेनैव तत्प्रसिद्धेः

अन्तर्व्याप्त्या हेतोःसाध्यप्रत्यायने शक्तावशक्तौ च बहिर्व्याप्तेरुद्भावनं व्यर्थम् ॥ ३५ ॥

पक्षीकृतएवविषये साधनस्य साध्येन व्याप्ति-

रन्तर्व्याप्तिरन्यत्र तु बहिर्व्याप्तिः यथाऽनैकान्तात्मकं वस्तु सत्त्वस्य तथैवोपपत्तेः । अग्निमानयं देशो धूमवत्त्वात् य एवं स एवं यथा पाकस्थानम् ॥ ३६ ॥

नोपनयनिगमनयोरपि परप्रतिपत्तौ सामर्थ्यं पक्षहेतुप्रयोगादेव तस्याः सद्भावात् ॥ ३७ ॥

समर्थनमेव परं परप्रतिपत्त्यङ्गमास्तां तदन्तरेण दृष्टान्तादिप्रयोगेऽपि तदसंभवात् ॥ ३८ ॥

मन्दमतींस्तु व्युत्पादयितुं दृष्टान्तोपनयनिगमनान्यपि प्रयोज्यानि ॥ ३९ ॥

प्रतिबन्धप्रतिपत्तेरास्पदं दृष्टान्तः ॥ ४० ॥

स द्वेधा साधर्म्यतो वैधर्म्यतश्च ॥ ४१ ॥

यत्र साधनधर्मसत्तायामवश्यं साध्यधर्मसत्ता प्रकाश्यते स साधर्म्यदृष्टान्तः ॥ ४२ ॥

यथा यत्र धूमस्तत्र वह्निर्यथा महानसः॥४३॥

यत्र तु साध्याभावे साधनस्यावश्यमभावः प्रदर्श्यते सवैधर्म्यदृष्टान्तः ॥ ४४ ॥

यथाग्न्यभावे नभवत्येवधूमो यथा जलाशये४५

हेतोःसाध्यधर्म्मिण्युपसंहरणमुपनयः ॥४६॥

यथा धूमश्चात्र प्रदेशे ॥४७॥

साध्यधर्मस्य पुनर्निगमनम् ॥ ४८ ॥

यथा तस्मादग्निरत्र ॥४९॥

एते पक्षप्रयोगादयः पञ्चाप्यवयवसंज्ञया कीर्त्यन्ते ॥५०॥

उक्तलक्षणो हेतुर्द्विप्रकारःउपलब्ध्यनुपलब्धिभ्यां भिद्यमानत्वात् ॥५१ ॥

उपलब्धिर्विधिनिषेधयोः सिद्धिनिबन्धनमनुपलब्धिश्च ॥५२॥

त्रिविः सदंशः प्रतिषेधोऽसदंशः ॥५३॥

सचतुर्द्धा प्रागभावः प्रध्वंसाभाव इतरेतरा-
भावोऽत्यन्ताभावश्च ॥५४॥

यन्निवृत्तावेव कार्यस्यसमुत्पात्तिः सोऽस्यप्रा-
गभावः ॥५५॥

यथा मृत्पिण्डानिवृत्तावेव समुत्पद्यमानस्य
घटस्य मृत्पिण्डः ॥५६॥

यदुत्पत्तौ कार्यस्यावश्यं विपत्तिः सोऽस्य प्र-
ध्वंसाभावः ॥५७॥

यथा कपालकदम्बकोत्पत्तौ नियमतो विपद्य-
मानस्य कलशस्य कपालकदम्बकम् ॥५८॥

स्वरूपान्तरात् स्वरूपव्यावृत्तिरितरेतराभावः ५९

यथा स्तंभस्वभावात् कुंभस्वभावव्यावृत्तिः६०

कालत्रयापेक्षिणी तादात्म्यपरिणामनिवृत्ति-
रत्यन्ताभावः ॥६१॥

यथा चेतनाऽचेतनयोः ॥६२॥

उपलब्धेरपि द्वैविध्यमविरुद्धोपलब्धिर्विरु-
द्धोपलब्धिश्च ॥ ६३ ॥

तत्राऽविरुद्धोपलब्धिर्विधिसिद्धौ षोढा ६४॥

साध्येनाविरुद्धानां व्याप्यकार्यकारणपूर्वच-
रोत्तरचरसहचराणामुपलब्धिरिति॥६५॥

तमस्विन्यामास्वाद्यमानादाम्रादिफलरसा-
देकसामग्र्यनुमित्या रूपाद्यनुमितिमभिम-
न्यमानैरभिमतमेव किमपि कारणं हेतुतया
यत्र शक्तेरप्रतिस्खलनमपरकारणसाकल्यञ्च६६

पूर्वचरोत्तरचरयोर्नस्वभावकार्यकारणभावौ-
तयोः कालव्यवहितावनुपलम्भात्॥ ६७ ॥

नचातिक्रान्तानागतयोर्जाग्रद्दशासंवेदनम-
रणयोःप्रबोधोत्पातौ प्रति कारणत्वं व्यवहि-

तत्त्वेन निर्व्यापारत्वात् ॥ ६८ ॥

स्वव्यापारापेक्षिणी हि कार्यं प्रति पदार्थस्य कारणत्वव्यवस्था कुलालस्येव कलशं प्रति ॥ ६९ ॥

न च व्यवहितयोस्तयोर्व्यापारपरिकल्पनं न्याय्यमतिप्रसक्तेः ॥ ७० ॥

परंपराव्यवहितानां परेषामपि तत्कल्पनस्य निवारयितुमशक्यत्वात् ॥ ७१ ॥

सहचारिणोः परस्परस्वरूपपरित्यागेन तादात्म्यानुपपत्तेः सहोत्पादेन तदुत्पत्तिविपत्तेश्च सहचरहेतोरपि प्रोक्तेषु नानुप्रवेशः ॥ ७२

ध्वनिः परिणतिमान् प्रयत्नानन्तरीयकत्वात् यः प्रयत्नानन्तरीयकः स परिणतिमान् यथास्तम्भो यो वा न परिणतिमान् स न प्रयत्नान-

न्तरीयको यथा वान्ध्ययः प्रयत्नानन्तरीयक-
श्च ध्वनिस्तस्मात्परिणतिमानिति व्याप्यस्य
साध्येनाविरुद्धस्योपलब्धिः साधर्म्येण वै-
धर्म्येणच ॥ ७३ ॥

अस्त्यत्र गिरिनिकुञ्जे धनञ्जयो धूमसमुप-
लम्भादिति कार्यस्य ॥ ७४ ॥

भविष्यति वर्षं तथाविधवारिवाहविलोक-
नादिति कारणस्य ॥ ७५ ॥

उदेष्यति मुहूर्त्तान्ते तिष्यतारका पुनर्वसूद-
यदर्शनादिति पूर्वचरस्य ॥ ७६ ॥

उदगुर्मुहूर्त्तात्पूर्वंपूर्वफल्गुन्यउत्तरफल्गुनीना-
मुद्गमोपलब्धेरित्युत्तरचरस्य ॥ ७७ ॥

अस्तीह सहकारफले रूपविशेषः समास्वाद्य-
मानरसविशेषादिति सहचरस्य ॥ ७८ ॥

विरुद्धोपलब्धिस्तु प्रतिषेधप्रतिपत्तौ सप्तप्रकारा ॥ ७९ ॥

तत्राद्या स्वभावविरुद्धोपलब्धिर्यथा ॥८०॥

नास्त्येव सर्वथैकान्तोऽनेकान्तस्योपलम्भात् ८१

प्रतिषेध्यविरुद्धव्याप्तादीनामुपलब्धयः षट् ८२

विरुद्धव्याप्तोपलब्धिर्यथा नास्त्यस्य पुंसस्तत्त्वेषु निश्चयस्तत्रसन्देहात् ॥ ८३ ॥

विरुद्धकार्योपलब्धिर्यथा न विद्यते ऽस्य क्रोधाद्युपशान्तिर्वदनविकारादेः ॥ ८४ ॥

विरुद्धकारणोपलब्धिर्यथा नास्य महर्षेरसत्यं वचः समस्तरागद्वेषकालुष्याकलङ्कितज्ञानसंपन्नत्वात् ॥ ८५ ॥

विरुद्धपूर्वचरोपलब्धिर्यथा नोद्गमिष्यति मुहूर्त्तान्ते पुष्यतारा रोहिण्युद्गमात ॥ ८६ ॥

विरुद्धोत्तरचरोपलब्धिर्यथा नोदगान् मुहू-र्त्तात्पूर्वं मृगशिरः पूर्वफल्गुन्युदयात् ॥८७॥

विरुद्धसहचरोपलब्धिर्यथा नास्त्यस्य मिथ्या ज्ञानं सम्यग्दर्शनात् ॥ ८८ ॥

अनुपलब्धेरपि द्वैरूप्यमविरुद्धानुपलब्धिर्वि-रुद्धानुपलब्धिश्च ॥ ८९ ॥

तत्राविरुद्धानुपलब्धिःप्रतिषेधावबोधे सप्त-प्रकारा ॥ ९० ॥

प्रतिषेध्येनाविरुद्धानां स्वभावव्यापककार्य-कारणपूर्वचरोत्तरचरसहचराणामनुपलब्धि-रिति ॥ ९१ ॥

स्वभावानुपलब्धिर्यथा नास्त्यत्र भूतले कुम्भ उपलब्धिलक्षणप्राप्तस्य तत्स्वभावस्यानुप-लम्भात् ॥ ९२ ॥

व्यापकानुपलब्धिर्यथा नास्त्यत्रप्रदेशे पनसः पादपानुपलब्धेः ॥९३॥

कार्यानुपलब्धिर्यथा नास्त्यत्राप्रतिहतशक्तिकं बीजमङ्कुरानवलोकनात् ॥९४॥

कारणानुपलब्धिर्यथा न सन्त्यस्य प्रशमप्रभृतयो भावास्तत्त्वार्थश्रद्धानाभावात् ॥९५॥

पूर्वचरानुपलब्धिर्यथा नोद्गमिष्यति मुहूर्त्तान्ते स्वातिनक्षत्रं चित्रोदयादर्शनात् ॥९६॥

उत्तरचरानुपलब्धिर्यथा नोदगमत् पूर्वभद्रपदा मुहूर्त्तात्पूर्वमुत्तरभद्रपदोद्गमानवगमात् ॥९७॥

सहचरानुपलब्धिर्यथा नास्त्यस्य सम्यग्ज्ञानं सम्यग्दर्शनानुपलब्धेः ॥९८॥

विरुद्धानुपलब्धिस्तु विधिप्रतीतौ पञ्चधा॥९९

विरुद्धकार्यकारणस्वभावव्यापकसहचरा-
नुपलम्भभेदात् ॥१००॥

विरुद्धकार्यानुपलब्धिर्यथाऽत्रशरीरिणि रो-
गातिशयः समस्ति निरोगव्यापारानुपल-
ब्धेः ॥१०१॥

विरुद्धकारणानुपलब्धिर्यथा विद्यतेऽत्र प्रा-
णिनि कष्टमिष्टसंयोगाभावात् ॥१०२॥

विरुद्धस्वभावानुपलब्धिर्यथा वस्तुजातमने-
कान्तात्मकमेकान्तस्वभावानुपलम्भात् १०३

विरुद्धव्यापकानुपलब्धिर्यथाऽस्त्यत्र च्छा-
या औष्ण्यानुपलब्धेः ॥१०४॥

विरुद्धसहचरानुपलब्धिर्यथाऽस्त्यस्य मि-
थ्याज्ञानं सम्यग्दर्शनानुपलब्धेः ॥१०५॥

इतिस्मरणप्रत्यभिज्ञानतर्कानुमानस्वरूप-
निर्णयोनामतृतीयः परिच्छेदः ॥ ३ ॥

आप्तवचनादाविर्भूतमर्थसंवेदनमागमः ॥ १ ॥

उपचारादाप्तवचनञ्च ॥ २ ॥

यथा समस्त्यत्र प्रदेशे रत्ननिधानं सन्ति रत्नसानुप्रभृतयः ॥ ३ ॥

अभिधेयं वस्तु यथावस्थितं यो जानीते यथाज्ञानञ्चाभिधत्ते स आप्तः ॥ ४ ॥

तस्य हि वचनमविसंवादि भवति ॥ ५ ॥

स च द्वेधा लौकिको लोकोत्तरश्च ॥ ६ ॥

लौकिको जनकादिर्लोकोत्तरस्तु तीर्थकरादिः ॥ ७ ॥

वर्णपदवाक्यात्मकं वचनम् ॥ ८ ॥

अकारादिः पौद्गलिको वर्णः ॥ ९ ॥

वर्णानामन्योन्यापेक्षाणां निरपेक्षा संहतिः पदं पदानान्तु वाक्यम् ॥ १० ॥

स्वभाविकसामर्थ्यसमयाभ्यामर्थबोधनिबन्धनं शब्दः ॥ ११॥

अर्थप्रकाशकत्वमस्य स्वाभाविकं प्रदीपवत् यथार्थत्वायथार्थत्वे पुनः पुरुषगुणदोषावनुसरतः ॥ १२ ॥

सर्वत्रायं ध्वनिर्विधिप्रतिषेधाभ्यां स्वार्थमभिदधानः सप्तभङ्गीमनुगच्छति ॥ १३ ॥

एकत्र वस्तुन्येकैकधर्मपर्यनुयोगवशादविरोधेन व्यस्तयोःसमस्तयोश्च विधिनिषेधयोः कल्पनया स्यात्काराङ्कितःसप्तधावाक्प्रयोगः सप्तभङ्गी ॥ १४॥

तद्यथा स्यादस्त्येव सर्वमिति विधिकल्पनया प्रथमोभङ्गः ॥ १५॥

स्यान्नास्त्येव सर्वमितिनिषेधकल्पनया द्वितीयः ॥ १६ ॥

स्यादस्त्येव स्यान्नास्त्येवेति क्रमतोविधिनिषेधकल्पनया तृतीयः ॥ १७॥

स्यादवक्तव्यमेवेति युगपद्विधिनिषेधकल्पनया चतुर्थः ॥ १८॥

स्यादस्त्येव स्यादवक्तव्यमेवेति विधिकल्पनया युगपद्विधिनिषेधकल्पनया च पञ्चमः १९

स्यान्नास्त्येव स्यादवक्तव्यमेवेति निषेधकल्पनया युगपद्विधिनिषेधकल्पनया च षष्ठः २०

स्यादस्त्येव स्यान्नास्त्येव स्यादवक्तव्यमेवेति क्रमतोविधिनिषेधकल्पनया युगपद्विधिनिषेधकल्पनया च सप्तमइति ॥ २१ ॥

विधिप्रधानएव ध्वनिरिति न साधु॥२२॥

निषेधस्य तस्मादप्रतिपत्तिप्रसक्तेः ॥२३॥

अप्राधान्येनैव ध्वनिस्तमभिधत्तइत्यप्यसारम्२४

क्वचित्कदाचित्कथञ्चित्प्राधान्येनाप्रतिप-
न्नस्य तस्याप्राधान्याऽनुपपत्तेः ॥ २५ ॥

निषेधप्रधानएव शब्द इत्यपि प्रागुक्तन्याया-
दपास्तम् ॥ २६ ॥

क्रमादुभयप्रधानएवायमित्यपि नसाधीयः २७

अस्य विधिनिषेधाऽन्यतरप्रधानतयानुभव-
स्याप्यबाध्यमानत्वात् ॥ २८ ॥

युगपद्विधिनिषेधात्मनो ऽर्थस्यावाचक ए-
वासौ इतिवचो न चतुरस्रम् ॥ २९ ॥

तस्यावक्तव्यशब्देनाप्यवाच्यत्वप्रसङ्गात् ३०

विध्यात्मनोऽर्थस्य वाचकः सन्नुभयात्मनोयु
गपदवाचकएव स इत्येकान्तोपिनकान्तः ३१

निषेधात्मनः सहद्वयात्मनश्चार्थस्य वाचक-
त्वावाचकत्वाभ्यामपिशब्दस्य प्रतीयमान-
त्वात् ॥ ३२ ॥

निषेधात्मना ऽर्थस्य वाचकः सन्नुभयात्मनो युगपदवाचक एवायमित्यप्यवधारणं न रमणीयम् ॥ ३३ ॥

इतरथापि संवेदनात् ॥ ३४ ॥

क्रमाक्रमाभ्यामुभयस्वभावस्य भावस्य वाचकश्चावाचकश्च ध्वनिर्नान्यथा इत्यपि मिथ्या ॥ ३५ ॥

विधिमात्रादिप्रधानतयाऽपि तस्य प्रसिद्धेः ३६

एकत्र वस्तुनि विधीयमाननिषिध्यमानानन्तधर्माभ्युपगमेनानन्तभङ्गीप्रसङ्गादसङ्गतैव सप्तभङ्गीति न चेतसि निधेयम् ॥ ३७ ॥

विधिनिषेधप्रकारापेक्षया प्रतिपर्यायं वस्तून्यनन्तानामपि सप्तभङ्गीनामेव संभवात् ३८

प्रतिपर्यायं प्रतिपाद्यपर्यनुयोगानां सप्ता-

नामेव संभवात् ॥ ३९ ॥

तेषामपि सप्तत्वं सप्तविधतज्जिज्ञासानियमात् ॥ ४० ॥

तस्या ऽपि सप्तविधत्वं सप्तधैव तत्सन्देहसमुत्पादात् ॥ ४१ ॥

तस्या ऽपिसप्तप्रकारत्वनियमः स्वगोचरवस्तुधर्माणां सप्तविधत्वस्यैवोपपत्तेः ॥ ४२ ॥

इयंसप्तभङ्गी प्रतिभङ्गं सकलादेशस्वभावा विकलादेशस्वभावा च ॥ ४३ ॥

प्रमाणप्रतिपन्नानन्तधर्मात्मकवस्तुनःकालादिभिरभेदवृत्तिप्राधान्यादभेदोपचाराद्वा यौगपद्येन प्रतिपादकं वचःसकलादेशः ४४

तद्विपरीतस्तु विकलादेशः ॥ ४५ ॥

तद्धि भेदमपिप्रमाणमात्मीयप्रतिबन्धकाप-

गमविशेषस्वरूपसामर्थ्यतः प्रतिनियतमर्थमवद्योतयति ॥ ४६ ॥

नतदुत्पत्तितदाकारताभ्यां तयोःपार्थ्यैक्येन सामस्त्येन च व्यभिचारोपलम्भात् ॥ ४७ ॥

इति आगमाख्यप्रमाणस्वरूपनिर्णयोनामचतुर्थः परिच्छेदः ४

तस्य विषयः सामान्यविशेषाद्यनेकान्तात्मकं वस्तु ॥ १ ॥

अनुगतविशिष्टाकारप्रतीतिविषयत्वात् प्राचीनोत्तराकारपरित्यागोपादानावस्थानस्वरूपपरिणत्यार्थक्रियासामर्थ्यघटनाच्च २

सामान्यं द्विप्रकारं तिर्यक्सामान्यमूर्द्धतासामान्यञ्च ॥ ३ ॥

प्रतिव्यक्तितुल्यापरिणतिस्तिर्यक्सामान्यं शबलशाबलेयादिपिण्डेषु गोत्वं यथा॥४॥

पूर्वापरपरिणामसाधारणंद्रव्यमूर्द्धतासामान्यं कटककङ्कणाद्यनुगामिकाञ्चनवत् ॥५॥

विशेषोपि द्विरूपो गुणः पर्यायश्च ॥ ६ ॥

गुणः सहभावीधर्मो यथात्मनि विज्ञानव्यक्तिशक्त्यादिः ॥ ७ ॥

पर्यायस्तूक्रमभावी यथातत्रैवसुखदुःखादिः ८

इतिविषयस्वरूपनिर्णयोनामपञ्चमः परिच्छेदः ।

यत्प्रमाणेन प्रसाध्यते तदस्य फलम् ॥ १ ॥

तद्द्विविधमानन्तर्येण पारम्पर्येण च ॥ २ ॥

तत्राऽऽनन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलम् ॥ ३ ॥

पारम्पर्येण केवलज्ञानस्य तावत्फलमौदासीन्यम् ॥ ४ ॥

शेषप्रमाणानां पुनरुपादानहानोपेक्षाबुद्धयः ॥ ५ ॥

तत्प्रमाणतः स्याद्भिन्नमभिन्नं च प्रमाणफलत्वान्यथानुपपत्तेः ॥ ६ ॥

उपादानबुध्यादिना प्रमाणाद्भिन्नेन व्यवहितफलेन हेतोर्व्यभिचारइति न विभावनीयम् ॥ ७ ॥

तस्यैकप्रमातृतादात्म्येन प्रमाणादभेदव्यवस्थितेः ॥ ८ ॥

प्रमाणतया परिणतस्यैवात्मनः फलतया परिणतिप्रतीतेः ॥ ९ ॥

यः प्रमिमीते स एवोपादत्ते परित्यजत्युपेक्ष-

ते चेति सर्वसंव्यवहारिभिरस्खलितमनुभवात् ॥ १० ॥

इतरथा स्वपरयोः प्रमाणफलव्यवस्थाविप्लवः प्रसज्येत ॥ ११ ॥

अज्ञाननिवृत्तिस्वरूपेण प्रमाणादभिन्नेन साक्षात्फलेन साधनस्यानेकान्तइति नाशङ्कनीयम् ॥ १२ ॥

कथञ्चित्तस्यापि प्रमाणाद्भेदेन व्यवस्थानात् १३

साध्यसाधनभावेन प्रमाणफलयोःप्रतीयमानत्वात् ॥ १४ ॥

प्रमाणं हि करणाख्यं साधनं स्वपरव्यवसितौ साधकतमत्वात् ॥ १५ ॥

स्वपरव्यवसितिक्रियारूपाऽज्ञाननिवृत्त्याख्यं फलं तु साध्यं प्रमाणनिष्पाद्यत्वात् ॥ १६ ॥

प्रमातुरपि स्वपरव्यवसितिक्रियायाः कथ-
ञ्चिद्भेदः ॥ १७॥

कर्तृक्रिययोःसाध्यसाधकभावनोपलम्भात् ॥
कर्त्ता हि साधकः स्वतन्त्रत्वात् क्रियातु सा-
ध्या कर्तृनिर्वर्त्त्यत्वात् ॥१९॥

न च क्रियाक्रियावतः सकाशादभिन्नैव
भिन्नैव वा प्रतिनियतक्रियाक्रियावद्भावभङ्ग-
प्रसङ्गात् ॥ २० ॥

संवृत्या प्रमाणफलव्यवहार इत्यप्रामाणिक-
प्रलापः परमार्थतः स्वाभिमतसिद्धिविरो-
धात् ॥ २१ ॥

ततः पारमार्थिक एव प्रमाणफलव्यवहारः
सकलपुरुषार्थसिद्धिहेतुः स्वीकर्त्तव्यः।२२।
प्रमाणस्य स्वरूपादिचतुष्टयाद्विपरीतं तदा-

भासम् ॥ २३ ॥

अज्ञानात्मकानात्मप्रकाशकस्वमात्रावभासकनिर्विकल्पकसमारोपाः प्रमाणस्य स्वरूपाभासाः ॥ २४ ॥

यथा सन्निकर्षाद्यस्वसंविदितपरानवभासकज्ञानदर्शनविपर्ययसंशयानध्यवसायाः ।

तेभ्यः स्वपरव्यवसायस्यानुपपत्तेः ॥ २६ ॥

सांव्यवहारिकप्रत्यक्षमिव यदाभासते तत्तदाभासम् ॥ २७ ॥

यथाऽम्बुधरेषु गन्धर्वनगरज्ञानं दुःखे सुखज्ञानञ्च ॥ २८ ॥

पारमार्थिकप्रत्यक्षमिव यदाभासते तत्तदाभासम् ॥ २९ ॥

यथा शिवाख्यस्य राजर्षेरसंख्यातद्वीपसमु-

द्वेषु सप्तद्वीपसमुद्रज्ञानम् ॥ ३० ॥

अननुभूते वस्तुनि तदिति ज्ञानं स्मरणाभासम् ॥ ३१ ॥

अननुभूते मुनिमण्डले तन्मुनिमण्डलमिति यथा

तुल्ये पदार्थे स एवायमित्येकस्मिश्च तेन तुल्य इत्यादिज्ञानं प्रत्यभिज्ञाभासम् ॥ ३३ ॥

यमलकजातवत् ॥ ३४ ॥

असत्यामपि व्याप्तौ तदवभासस्तर्काभासः ३५

सश्यामो मैत्रतनयत्वात् इत्यत्र यावान् मैत्रतनयः सश्यामः इति यथा ॥ ३६ ॥

पक्षाभासादिसमुत्थं ज्ञानमनुमानाभासमवसेयम् ॥ ३७ ॥

तत्र प्रतीतानिराकृतानभीप्सितसाध्यधर्मविशेषणास्त्रयः पक्षाभासाः ॥ ३८ ॥

प्रतीतसाध्यधर्म्मविशेषणो यथार्हतान् प्रत्यवधारणवर्जं परेण प्रयुज्यमानः समस्तिजीव इत्यादि ॥३९॥

निराकृतसाध्यधर्मविशेषणः प्रत्याक्षानुमानागमलोकस्ववचनादिभिः साध्यधर्मस्य निराकरणादनेकप्रकारः ॥ ४० ॥

प्रत्यक्षनिराकृतसाध्यधर्म्मविशेषणो यथा नास्तिभूतविलक्षणआत्मा ॥ ४१ ॥

अनुमाननिराकृतसाध्यधर्मविशेषणो यथा नास्ति सर्वज्ञो वीतरगो वा ॥४२॥

आगमनिराकृतसाध्यधर्मविशेषणो यथा जैनै रजनिभोजनं भजनीयम् ॥४३॥

लोकनिराकृतसाध्यधर्म्मविशेषणो यथा नापारमार्थिकः प्रमाणप्रमेयव्यवहारः ॥४४॥

स्ववचननिराकृतसाध्यधर्म्मविशेषणो यथा नास्ति प्रमेयपरिच्छेदकं प्रमाणम् ॥४५॥

अनभीप्सितसाध्यधर्म्मविशेषणो यथा स्याद्वादिनः शाश्वतिकएव कलशादिरशाश्वतिक एवेति वदतः ॥४६॥

असिद्धविरुद्धानैकान्तिकास्त्रयोहेत्वाभासाः ॥ ४७ ॥

यस्यान्यथानुपपत्तिः प्रमाणेन न प्रतीयतेसोऽसिद्धः ॥४८॥

सद्विविध उभयासिद्धोऽन्यतरासिद्धश्च ४९

उभयासिद्धो यथा परिणामीशब्दश्चाक्षुषत्वात् ॥५०॥

अन्यतरासिद्धो यथा अचेतनास्तरवो विज्ञानेन्द्रियायुर्निरोधलक्षणमरणरहितत्वात् ।५१।

साध्यविपर्ययेणैव यस्यान्यथानुपपत्तिरध्यव-सीयते स विरुद्धः ॥५२॥

यथा नित्यएव पुरुषोऽनित्यएव वा प्रत्यभि ज्ञानादिमत्वात् ॥५३॥

यस्यान्यथानुपपत्तिः सन्दिह्यते सोऽनैका-न्तिकः ॥ ५४ ॥

सद्वेधा निर्णीतविपक्षवृत्तिकः सन्दिग्ध-विपक्षवृत्तिकश्च ॥ ५५ ॥

निर्णीतविपक्षवृत्तिको यथा नित्यः शब्दः प्रमेयत्वात् ॥५६॥

सन्दिग्धविपक्षवृत्तिको यथा विवादापन्नः पुरुषः सर्वज्ञो न भवति वक्तृत्वात् ॥५७॥

साधर्म्येण दृष्टान्ताभासोनवप्रकारः ॥५८॥

साध्यधर्मविकलः साधनधर्मविकलः उभ-

यधर्म्मविकलः सन्दिग्धसाध्यधर्म्मा सन्दिग्धसाधनधर्म्मा सन्दिग्धोभयधर्म्मानन्वयोऽप्रदर्शितान्वयो विपरीतान्वयश्चेति ५९।

तत्रापौरुषेयः शब्दोऽमूर्त्तत्वाद्दुःखवदिति साध्यधर्म्मविकलः ॥ १ ॥ ६० ॥

तस्यामेव प्रतिज्ञायां तस्मिन्नेव हेतौ परमाणुवदिति साधनधर्म्मविकलः ॥ १॥६१॥

कलशवदित्युभयधर्म्मविकलः ॥ १ ॥ ६२॥

रागादिमानयं वक्तृत्वाद्देवदत्तवदिति सन्दिग्धसाध्यधर्मा ॥ ३ ॥ ६३ ॥

मरणधर्मायं रागादिमत्वात् मैत्रवदिति संदिग्धसाधनधर्मा ॥ ५ ॥६४॥

नायं सर्वदर्शी रागादिमत्त्वान्मुनिविशेषवदिति सन्दिग्धोभयधर्मा । ६ । ६५ ॥

रागादिमान् विवक्षितः पुरुषोवक्तृत्वादिष्ट-
पुरुषवदित्यनन्वयः । ७ । ६६ ॥

अनित्यः शब्दः कृतकत्वात् घटवदित्य-
प्रदर्शितान्वयः । ८ । ६७ ॥

अनित्यः शब्दः कृतकत्वात् यदनित्यं
तत् कृतकं घटवदिति विपरीतान्वयः।९।६८॥
वैधर्म्येणापि दृष्टान्ताभासो नवधा ॥६९॥
असिद्धसाध्यव्यतिरेकोऽसिद्धसाधनव्यति-
रेकोऽसिद्धोभयव्यतिरेकः सन्दिग्धसाध्य-
व्यतिरेकः सन्दिग्धसाधनव्यतिरेकः सन्दि-
ग्धोभयव्यतिरेकोऽव्यतिरेकोऽप्रदर्शितव्य-
तिरेको विपरीतव्यतिरेकश्च ॥ ७० ॥

तेषु भ्रान्तमनुमानं प्रमाणत्वात्यत्पुनर्भ्रान्तं
न भवति न तत् प्रमाणं यथा स्वप्नज्ञानमिति

असिद्धसाध्यव्यतिरेकः स्वप्न ज्ञानात् भ्रान्त त्वस्यानिवृत्तेः । १ । ७१ ॥

निर्विकल्पकं प्रत्यक्षं प्रमाणत्वाद्यत्तु सविकल्पकं न तत्प्रमाणं यथा लैङ्गिकमित्यसिद्ध-साधनव्यतिरेको लैङ्गिकात्प्रमाणत्वस्या-निवृत्तेः । २ । ७२ ॥

नित्यानित्यःशब्दः सत्वात् यस्तु न नित्या-नित्यः सनसंस्तद्यथा स्तम्भ इत्यसिद्धो-भयव्यतिरेकः स्तम्भान्नित्यान्नित्यत्वस्य सत्त्वस्य चाव्यावृत्तेः । ३ । ७३ ॥

असर्वज्ञोऽनाप्तो वा कपिलोऽक्षीणकैकान्त-वादित्वाद्यः सर्वज्ञ आप्तो वा सक्षणिकैका-न्तवादी यथासुगत इति सान्दिग्धसाध्यव्य-तिरेकः सुगतेऽसर्वज्ञतानाप्तत्वयोः साध्य-

धर्मिणोऽर्थानिवृत्तेः सन्देहात् । ४ । ७४ ॥

अनादेयवचनः कश्चिद्विवक्षितः पुरुषो रागादिमत्त्वात्, यः पुनरादेयवचनः स वीतरागस्तद्यथा शौद्धोदनिरिति सन्दिग्धसाधनव्यतिरेकः शौद्धोदनौ रागादिमत्त्वस्य निवृत्तेः संशयात् । ७५ ॥ ५ ॥

नवीतरागः कपिलः करुणास्पदेष्वपि परमकृपयाऽनर्पितनिजपिशितशकलत्वात् यस्तु वीतरागः स करुणास्पदेषु परमकृपया समर्पितनिजपिशितशकलस्तद्यथा तपनबन्धुरिति सन्दिग्धोभयव्यतिरेकः तपनबन्धौ वीतरागत्वाभावस्य करुणास्पदेष्वपि परमकृपयाऽनर्पितनिजपिशितशकलत्वस्य च व्यावृत्तेः सन्देहात् । ६ ॥ ७६ ॥

न वीतरागः कश्चिद्विवक्षितः पुरुषोवक्तृ-त्वात् यः पुनर्वीतरागो न स वक्ता यथोपल-खण्डइत्यव्यतिरेकः । ७७ ॥ ७ ॥

अनित्यः शब्दः कृतकत्वादाकाशवदित्य-प्रदर्शितव्यतिरेकः । ७८ ॥ ७ ॥

अनित्यः शब्दः कृतकत्वाद्यदकृतकं तन्नित्यं यथाकाशमिति विपरीतव्यतिरेकः ।७९॥२॥

उक्तलक्षणोल्लङ्घनेनोपनयनिगमनयोर्वचने तदाभासौ ॥ ८० ॥

यथापरिणामीशब्दः कृतकत्वाद्यः कृतकः स परिणामी यथा कुम्भ इत्यत्र परिणामी च शब्द इति कृतकश्च कुम्भ इति च ८१।

तस्मिन्नेव प्रयोगे तस्मात् कृतकः शब्द-इति तस्मात्परिणामी कुम्भ इति वा ॥८२॥

अनाप्तवचनप्रभवं ज्ञानमागमाभासम्।८३।

यथा मेकलकन्यकायाः कूले तालहिंताल-योर्मूलेसुलभाः पिण्डखर्जूराः सन्तित्वरितं गच्छत २ शावकाः ॥ ८४ ॥

प्रत्यक्षमेवैकं प्रमाणमित्यादि संख्यानं तस्य संख्याभासम् ॥ ८५ ॥

सामान्यमेव विशेषएव तद्द्वयं वा स्वतन्त्र-मित्यादिस्तस्य विषयाभासः ॥ ८६ ॥

अभिन्नमेव भिन्नमेव वा प्रमाणात्फलं तस्य तदाभासम् ॥ ८७ ॥

इति फलप्रमाणस्वरूपाद्याभासनिर्णयोनाम षष्ठः परिच्छेदः ॥ ६ ॥

नीयते येन श्रुताख्यप्रमाणविषयीकृतस्यार्थ-
स्यांशस्तदितरांशौदासीन्यतः सप्रतिपत्तुर-
भिप्रायविशेषोनयः ॥ १ ॥

स्वाभिप्रेतादंशादितरांशापलापी पुनर्नया-
भासः ॥ २ ॥

सव्याससमासाभ्यान्द्विप्रकारः ॥ ३ ॥

व्यासतोऽनेकविकल्पः ॥ ४ ॥

समासतस्तुद्विभेदो द्रव्यार्थिकः पर्यायार्थि-
कश्च ॥ ५ ॥

आद्यो नैगमसंग्रहव्यवहारभेदात्त्रेधा ॥ ६ ॥

धर्म्मयोर्धर्म्मिणोर्धर्म्मधर्म्मिणोश्चप्रधानोप-
सर्जनभावेन यद्विवक्षणं सनैकगमोनै-
गमः ॥ ७ ॥

सच्चैतन्यमात्मनीतिधर्म्मयोः ॥ ८ ॥

वस्तुपर्यायवद्द्रव्यं इति धर्म्मिणोः ॥ ९ ॥

क्षणमेकं सुखीविषयासक्तजीवइति धर्म-धर्म्मिणोः ॥ १० ॥

धर्म्मद्वयादीनामैकान्तिकपार्थक्याभिसन्धि-नैगमाभासः ॥ ११ ॥

यथात्मनि सत्त्वचैतन्ये परस्परमत्यन्तं पृथग्भूते इत्यादि ॥ १२ ॥

सामान्यमात्रग्राही परामर्शः संग्रहः ॥१३॥

अयमुभयविकल्पः परोऽपरश्च ॥ १४ ॥

अशेषविशेषेष्वौदासीन्यम्भजमानः शुद्ध-द्रव्यं सन्मात्रमभिमन्यमानः परः संग्रहः १५

विश्वमेकं सदविशेषादिति यथा ॥ १६ ॥

सत्ताद्वैतं स्वीकुर्वाणः सकलविशेषान्निरा-चक्षाणस्तदाभासः ॥ १७ ॥

यथासत्तैव तत्त्वन्ततः पृथग्भूतानां विशेषाणामदर्शनात् ॥ १८ ॥

द्रव्यत्वादीन्यवान्तरसामान्यानि मन्वानस्तद्भेदेषु गजनिमीलिकामवलम्बमानः पुनरपरसंग्रहः ॥ १९ ॥

धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामैक्यं द्रव्यत्वाभेदादित्यादिर्यथा ॥ २० ॥

द्रव्यत्वादिकं प्रतिजानानस्तद्विशेषान्निह्नुवानस्तदाभासः ॥ २१ ॥

यथा द्रव्यत्वमेव तत्त्वं ततोर्थान्तरभूतानां द्रव्याणामनुपलब्धेः ॥ २२ ॥

संग्रहेण गोचरीकृतानामर्थानां विधिपूर्वकमवहरणं येनाभिसन्धिना क्रियते स व्यवहारः ॥ २३ ॥

यथा यत्सत्तद्द्रव्यं पर्यायोवेत्यादि ॥२४॥

यः पुनरपारमार्थिकद्रव्यपर्यायविभागमभिप्रैति स व्यवहाराभासः ॥ २५॥

यथा चार्वाकदर्शनम् ॥ २६ ॥

पर्यायार्थिकश्चतुर्द्धा ऋजुसूत्रः शब्दः समभिरूढ एवंभूतश्च ॥ २७ ॥

ऋजुवर्त्तमानक्षणस्थायिपर्यायमात्रंप्राधान्यतः सूत्रयन्नभिप्राय विशेष ऋजुसूत्रः ॥ २८ ॥

यथासुखविवर्त्तः सम्प्रत्यस्तीत्यादि ॥२९॥

सर्वथाद्रव्यापलापीतदाभासः ॥ ३० ॥

यथा तथागतमतम् ॥ ३१ ॥

कालादिभेदेन ध्वनेरर्थभेदं प्रतिपद्यमानः शब्दः ॥ ३२ ॥

यथा बभूव भवति भविष्यति सुमेरुरित्यादिः।

तद्भेदेन तस्य तमेव समर्थयमानस्तदाभासः३४

यथा बभूव भवति भविष्यति सुमेरुरित्याद-
योभिन्नकालः शब्दाभिन्नमेवार्थमभिदध-
ति भिन्नकालशब्दत्वात्ताहक्सिद्धान्यश-
ब्दवदित्यादिः ॥ ३५ ॥

पर्यायशब्देषु निरुक्तिभेदेन भिन्नमर्थं सम-
भिरोहन्समभिरूढः ॥ ३६ ॥

इन्दनादिन्द्रः शकनाच्छक्रः पूर्दारणात्
पुरन्दर इत्यादिषु यथा ॥ ३६ ॥

पर्यायध्वनीनामभिधेयनानात्वमेव कक्षीकु-
र्वाणस्तदाभासः ॥ ३७ ॥

यथेन्द्रः शक्रः पुरन्दर इत्यादयः शब्दाभि-
न्नाभिधेयाएव भिन्नशब्दत्वात् करिकुरङ्ग-
तुरङ्गशब्दवदित्यादिः ॥ ३८ ॥

शब्दानां स्वप्रवृत्तिनिमित्तभूतक्रियाविशिष्टमर्थं वाच्यत्वेनाभ्युपगच्छन्नेवंभूतः ।३९।

यथेन्दनमनुभवन्निन्द्रः शकनक्रियापरिणतः शक्रः पूर्दारणप्रवृत्तः पुरन्दर इत्युच्यते ।४०।

क्रियानाविष्टं वस्तुशब्दवाच्यतया प्रतिक्षिपंस्तुतदाभासः ॥ ४२ ॥

यथाविशिष्टचेष्टाशून्यं घटाख्यं वस्तु न घटशब्दवाच्यं घटशब्दप्रवृत्तिनिमित्तभूतक्रियाशून्यत्वात् पटवदित्यादिः ॥ ४३ ॥

एतेषु चत्वारः प्रथमेऽर्थनिरूपणप्रवणत्वादर्थनयाः शेषास्तुत्रयः शब्दवाच्यार्थगोचरतया शब्दनयाः ॥ ४४ ॥

पूर्वः पूर्वोनयः प्रचुरगोचरः परः परस्तु परिमितविषयः ॥ ४५ ॥

सन्मात्रगोचरात्संग्रहान्नैगमो भावाभावभू-
मिकत्वात् भूमविषयः ॥ ४६ ॥
सद्विशेषप्रकाशकाद्व्यवहारतः संग्रहः समस्त-
सत्समूहोपदर्शकत्वात्बहुविषयः ॥ ४७ ॥
वर्त्तमानविषयादृजुसूत्राद्व्यवहारस्त्रिकाल-
विषयावलम्बित्वादनल्पार्थः ॥ ४८ ॥
कालादिभेदेन भिन्नार्थोपदर्शिनः शब्दादृ-
जुसूत्रस्तद्विपरीतवेदकत्वान्महार्थः ॥ ४९ ॥
प्रतिपर्यायशब्दमर्थभेदमभीप्सतः समभि-
रूढाच्छब्दस्तद्विपर्ययानुयायित्वात् प्रभूत-
विषयः ॥ ५० ॥

प्रतिक्रियं विभिन्नमर्थं प्रतिजानानादेवंभू-
तात्समभिरूढस्तदन्यथार्थस्थापकत्वान्महा-
गोचरः ॥ ५१ ॥

नयवाक्यमपिस्वविषये प्रवर्त्तमानं विधि-
प्रतिषेधाभ्यां सप्तभङ्गीमनुव्रजति॥ ५२ ॥

प्रमाणवदस्य फलं व्यवस्थापनीयम् ॥५३॥

प्रमाताप्रत्यक्षादिप्रसिद्धआत्मा ॥ ५४ ॥

चैतन्यस्वरूपः परिणामीकर्त्ता साक्षाद्भोक्ता-
स्वदेहपरिमाणः प्रतिक्षेत्रं भिन्नः पौद्गलि-
कादृष्टवांश्चायम् ॥ ५५ ॥

तस्योपात्तपुंस्त्रीशरीरस्य सम्यग्ज्ञानक्रियाभ्यां
कृत्स्नकर्मक्षयस्वरूपासिद्धिः ॥ ५६ ॥

इति श्रीदेवाचार्यनिर्मिते प्रमाणनयतत्त्वा-
लोकालङ्कारेनयात्मस्वरूपानिर्णयो नाम
सप्तमः परिच्छेदः ॥ ७ ॥

अष्टमः परिच्छेदः ।

विरुद्धयोर्धर्म्मयोरेकधर्म्मव्यवच्छेदेनस्वीकृ-
ततदन्यधर्म्मव्यवस्थापनार्थं साधनदूषण-
वचनं वादः ॥ १ ॥

प्रारम्भकश्चात्र विजिगीषुस्तत्त्वनिर्णिनीषुश्च

स्वीकृतधर्मव्यवस्थापनार्थं साधनदूषणाभ्यां
परं पराजेतुमिच्छुर्जिगीषुः॥ ३ ॥

तथैव तत्त्वंप्रतितिष्ठापयिषुस्तत्त्वनिर्णिनीषुः४

अयं च द्वेधा स्वात्मनि परत्र च ॥५॥

आद्यः शिष्यादिः ॥ ६ ॥

द्वितीयोगुर्वादिः ॥ ७ ॥

अयं द्विविधः क्षायोपशमिकज्ञानशाली
केवली च ॥ ८ ॥

एनेन प्रत्यारम्भकोपि व्याख्यातः ॥ ९ ॥

तत्र प्रथमे प्रथमतृतीयतुरीयाणां चतुरङ्गए-

वान्यतमस्याप्यङ्गस्यापाये जयपराजयव्यव-
स्थादिदौस्थ्यापत्तेः ॥१०॥

द्वितीये तृतीयस्य कदाचिद्द्व्यङ्गः कदाचित्त्र्यङ्गः
तत्रैव द्व्यङ्गस्तुरीयस्य ॥१२॥

तृतीये प्रथमादीनां यथायोगं पूर्ववत् ॥१३॥

तुरीये प्रथमादीनामेवम् ॥१४॥

वादिप्रतिवादिसभ्यसभापतयश्चत्वार्य्यङ्गानि

प्रारम्भकप्रत्यारम्भकावेव मल्लप्रतिमल्ल-
न्यायेन वादिप्रतिवादिनौ ॥ १६ ॥

प्रमाणतः स्वपक्षस्थापनप्रतिपक्षप्रतिक्षेपाव-
नयोः कर्म्म ॥१७॥

वादिप्रतिवादिसिद्धान्ततत्त्वनदीष्णत्वधार-
णाबाहुश्रुत्यप्रतिभाक्षान्तिमाध्यस्थैरुभयाभि-
मताःसभ्याः ॥ १८ ॥

वादिप्रतिवादिनोर्यथायोगं वादस्थानक-
कथाविशेषाङ्गीकारेणाग्रवादोत्तरवादनिर्देशः
साधकबाधकोक्तिगुणदोषावधारणं यथा-
वसरन्तत्त्वप्रकाशनेन कथाविरमणं यथासंभ-
वं सभायांकथाफलकथनं चैषांकर्माणि ॥१९॥

प्रज्ञाज्ञैश्वर्यक्षमामाध्यस्थ्यसंपन्नः सभापतिः॥

वादिसभ्याभिहितावधारणकलहव्यपोहादिकं
चास्य कर्म्म ॥२१॥

सजिगीषुकेऽस्मिन्यावत्सभ्यापेक्षं स्फूर्तौवक्त-
व्यम् ॥ २२ ॥

उभयोस्तत्त्वनिर्णिनीषुत्वेयावत्तत्त्वनिर्णयं
यावत्स्फूर्त्तिं च वाच्यम् ॥ २३ ॥

इतिश्रीदेवाचार्यनिर्मितेप्रमाणनयतत्त्वालोका-
लङ्कारेवादिप्रतिवादिन्यायनिर्णयोनामाष्टमः
परिच्छेदः ॥ ८ ॥

इदं पुस्तकं काश्यां चन्द्रप्रभामुद्रणालये
मुद्रितम् ।